श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामरक्षास्तोत्रम् ॥

अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य।
बुधकौशिक ऋषिः।
श्रीसीतारामचन्द्रो देवता।
अनुष्टुप् छन्दः।
सीता शक्तिः।
श्रीमद् हनुमान् कीलकम्।
श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः॥

## अथ ध्यानम्

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम्।
वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डनं रामचन्द्रम्॥

## अथ स्तोत्रम्

चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।
एकैकमक्षरं पुंसां महापातकनाशनम्॥ 1 ॥

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥ 2 ॥

सासितूणधनुर्बाणपाणिं नक्तञ्चरान्तकम्।
स्वलीलया जगत्रातुमाविर्भूतमजं विभुम्॥ 3 ॥

sunderkidambi
prapatti dot com
sunderkidambi

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्।
शिरो मे राघवः पातु फालं दशरथात्मजः॥ 4॥

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥ 5॥

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः॥ 6॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः॥ 7॥

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः।
ऊरू रघूत्तमः पातु रक्षः कुलविनाशकृत्॥ 8॥

जानुनी सेतुकृत्पातु जङ्घे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः॥ 9॥

एतां रामबलोपेतां रक्षां यः सुकृती पठेत्।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत्॥ 10॥

पातालभूतलव्योमचारिणश्छद्मचारिणः।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥ 11॥

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति॥ 12॥

जगज्जैत्रैकमन्त्रेण रामनाम्नाऽभिरक्षितम्।
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः॥ 13॥

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत्।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गळम्॥ 14॥

आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरः।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः॥ 15 ॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम्।
अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभुः॥ 16 ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ॥ 17 ॥

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ॥ 18 ॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम्।
रक्षः कुलनिहन्तारौ त्रायेतां नो रघूत्तमौ॥ 19 ॥

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम्॥ 20 ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः॥ 21 ॥

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः॥ 22 ॥

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः॥ 23 ॥

इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः।
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः॥ 24 ॥

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः॥ 25 ॥



sunder kidambi prapatti dot com sunder kidambi

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥ 26 ॥

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥ 27 ॥

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज राम राम।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम॥ 28 ॥

श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये॥ 29 ॥

माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः।
सर्वस्वं मे रामचन्द्रो दयालुः
नान्यं जाने नैव जाने न जाने॥ 30 ॥

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥ 31 ॥

लोकाभिरामं रणरङ्गधीरं
राजीवनेत्रं रघुवंशनाथम्।

sri prapatti dot com
sunder kidāmbi

कारुण्यरूपं करुणाकरं तं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥ 32 ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ 33 ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ 34 ॥

आपदामपहर्तारं दातारं सर्वसंपदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ 35 ॥

भर्जनं भवबीजानामर्जनं सुखसंपदाम्।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ 36 ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ 37 ॥

‡ राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ 38 ॥

॥ इति श्रीरामरक्षास्तोत्रं समाप्तम् ॥

prapatti.com sundarakidambi

## श्री राम आपदुद्धारक स्तोत्रम्

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥ 1 ॥

आपन्नजनरक्षैकदीक्षायामिततेजसे ।
नमोऽस्तु विष्णवे तुभ्यं रामायापन्निवारिणे ॥ 2 ॥

पदाम्भोजरजस्स्पर्शपवित्रमुनियोषिते ।
नमोऽस्तु सीतापतये रामायापन्निवारिणे ॥ 3 ॥

दानवेन्द्रमहामत्तगजपञ्चास्यरूपिणे ।
नमोऽस्तु रघुनाथाय रामायापन्निवारिणे ॥ 4 ॥

महिजाकुचसंलग्नकुङ्कुमारुणवक्षसे ।
नमः कल्याणरूपाय रामायापन्निवारिणे ॥ 5 ॥

पद्मसम्भव भूतेश मुनिसंस्तुतकीर्तये ।
नमो मार्ताण्डवंश्याय रामायापन्निवारिणे ॥ 6 ॥

हरत्यार्तिं च लोकानां यो वा मधुनिषूदनः ।
नमोऽस्तु हरये तुभ्यं रामायापन्निवारिणे ॥ 7 ॥

तापकारणसंसारगजसिंहस्वरूपिणे ।
नमो वेदान्तवेद्याय रामायापन्निवारिणे ॥ 8 ॥

रङ्गत्तरङ्गजलधिगर्वहृच्छरधारिणे ।
नमः प्रतापरूपाय रामायापन्निवारिणे ॥ 9 ॥

दारोपहितचन्द्रावतंसध्यातस्वमूर्तये ।
नमः सत्यस्वरूपाय रामायापन्निवारिणे ॥ 10 ॥

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ॥ 35 ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
तिष्ठन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ 36 ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

# Rama Dhyana Shlokam

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

वामाङ्गं स्थित जानकी परिलसत कोदण्ड दण्डं करे

चक्रं चोर्ध्व करेण बाहु युगले शङ्खं शरं दक्षिणे

बिभ्राणम् जल जात पत्र नयनं भद्राद्रि मूर्ति स्थितम्

केयूरादि विभूषितं रघु पतिम् सौमित्रि युक्तं भजे ||

वैदेहीसहितं सुरद्रुमतले हेमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयो वाय्वाधिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराज् तारासुतो जाम्बवान्
मध्ये नील सरोज कोमलरुचिं रामं भजे श्यामलम्

aapadaamapahartaraṃ daataaraṃ sarvasampadaam |
lokaabhiraamaṃ shriramaṃ bhuyo bhuyo naaamyaham ||

vamangam sthita janaki, parilasat kodanda dandam karee,

chakram chordva kareeNa baahu yugale, shankham sharam dakshine,

vibhraanam jala jaata patra nayanam, Bhadradri murti sthitam,

keyuraadi vibhushitam raghu patim, saumitri yuktam bhaje

vaidhehi sahitham suradrumathale haime mahamandape

madhye pushpakamasane manimaye veerasane susthitam

agre vacayati prabhanjana suthe thattvam munibhyah param

vyakhyantham bharatadibhih parivrtam ramam bhaje syamalam

vaame bhoomisutaa purashcha hanumaan pashchaat sumitraasutaH

shatrughno bharatashcha pArshvadalayor vAyvAdikoNeShu cha |

sugrIvashcha vibhIShaNashcha yuvarAT tArAsuto jAmvavAn

madhye nIlasarojakomalaruchiM rAmaM bhaje shyAmalam ||

# श्री रामाष्टोत्तर शत नामावलि

ॐ श्रीरामाय नमः
ॐ रामभद्राय नमः
ॐ रामचन्द्राय नमः
ॐ शाश्वताय नमः
ॐ राजीवलोचनाय नमः
ॐ श्रीमते नमः
ॐ राजेन्द्राय नमः
ॐ रघुपुङ्गवाय नमः
ॐ जानकीवल्लभाय नमः
ॐ जैत्राय नमः ॥ 10 ॥

ॐ जितामित्राय नमः
ॐ जनार्दनाय नमः
ॐ विश्वामित्रप्रियाय नमः
ॐ दान्ताय नमः
ॐ शरणत्राणतत्पराय नमः
ॐ वालिप्रमथनाय नमः
ॐ वाङ्मिने नमः
ॐ सत्यवाचे नमः
ॐ सत्यविक्रमाय नमः
ॐ सत्यव्रताय नमः ॥ 20 ॥

ॐ व्रतधराय नमः
ॐ सदा हनुमदाश्रिताय नमः
ॐ कोसलेयाय नमः
ॐ खरध्वंसिने नमः
ॐ विराधवधपण्डिताय नमः
ॐ विभीषणपरित्रात्रे नमः
ॐ हरकोदण्ड खण्डनाय नमः
ॐ सप्तसाल प्रभेत्त्रे नमः
ॐ दशग्रीवशिरोहराय नमः
ॐ जामदग्न्यमहादर्पदलनाय नमः ॥ 30 ॥

ॐ ताटकान्तकाय नमः
ॐ वेदान्त साराय नमः
ॐ वेदात्मने नमः
ॐ भवरोगस्य भेषजाय नमः
ॐ दूषणत्रिशिरोहन्त्रे नमः
ॐ त्रिमूर्तये नमः
ॐ त्रिगुणात्मकाय नमः
ॐ त्रिविक्रमाय नमः
ॐ त्रिलोकात्मने नमः
ॐ पुण्यचारित्रकीर्तनाय नमः ॥ 40 ॥

ॐ त्रिलोकरक्षकाय नमः
ॐ धन्विने नमः
ॐ दण्डकारण्यकर्तनाय नमः
ॐ अहल्याशापशमनाय नमः
ॐ पितृभक्ताय नमः
ॐ वरप्रदाय नमः
ॐ जितक्रोधाय नमः
ॐ जितामित्राय नमः
ॐ जगद्गुरवे नमः
ॐ ऋक्षवानरसङ्घातिने नमः ॥ 50॥

ॐ चित्रकूटसमाश्रयाय नमः
ॐ जयन्तत्राण वरदाय नमः
ॐ सुमित्रापुत्र सेविताय नमः
ॐ सर्वदेवादिदेवाय नमः
ॐ मृतवानरजीवनाय नमः
ॐ मायामारीचहन्त्रे नमः
ॐ महादेवाय नमः
ॐ महाभुजाय नमः
ॐ सर्वदेवस्तुताय नमः
ॐ सौम्याय नमः ॥ 60 ॥

ॐ ब्रह्मण्याय नमः
ॐ मुनिसंस्तुताय नमः

ॐ महायोगिने नमः

ॐ महोदाराय नमः

ॐ सुग्रीवेप्सित राज्यदाय नमः

ॐ सर्वपुण्याधिक फलाय नमः

ॐ स्मृतसर्वाघनाशनाय नमः

ॐ आदिपुरुषाय नमः

ॐ परमपुरुषाय नमः

ॐ महापुरुषाय नमः ॥ 70 ॥

ॐ पुण्योदयाय नमः

ॐ दयासाराय नमः

ॐ पुराणाय नमः

ॐ पुरुषोत्तमाय नमः

ॐ स्मितवक्त्राय नमः

ॐ मितभाषिणे नमः

ॐ पूर्वभाषिणे नमः

ॐ राघवाय नमः

ॐ अनन्तगुणगम्भीराय नमः

ॐ धीरोदात्त गुणोत्तमाय नमः ॥ 80 ॥

ॐ मायामानुषचारित्राय नमः

ॐ महादेवादि पूजिताय नमः

ॐ सेतुकृते नमः

ॐ जितवाराशये नमः

ॐ सर्वतीर्थमयाय नमः

ॐ हरये नमः

ॐ श्यामाङ्गाय नमः

ॐ सुन्दराय नमः

ॐ शूराय नमः

ॐ पीतवाससे नमः ॥ 90 ॥

ॐ धनुर्धराय नमः

ॐ सर्वयज्ञाधिपाय नमः

ॐ यज्वने नमः

ॐ जरामरणवर्जिताय नमः

ॐ शिवलिङ्गप्रतिष्ठात्रे नमः

ॐ सर्वावगुणवर्जिताय नमः

ॐ परमात्मने नमः

ॐ परस्मै ब्रह्मणे नमः

ॐ सच्चिदानन्द विग्रहाय नमः

ॐ परस्मैज्योतिषे नमः ॥ 100 ॥

ॐ परस्मै धाम्ने नमः

ॐ पराकाशाय नमः

ॐ परात्पराय नमः

ॐ परेशाय नमः

ॐ पारगाय नमः

ॐ पाराय नमः

ॐ सर्वदेवात्मकाय नमः

ॐ पराय नमः ॥ 108 ॥

इति श्री रामाष्टोत्तर शतनामावलीस्समाप्ता ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामभुजङ्गाष्टकम् ॥

भजे विशेषसुन्दरं समस्तपाप खण्डनम्।
स्वभक्त चित्तरञ्जनं स दैवराममद्वयम् ॥ 1 ॥

जटाकलापशोभितं समस्तपापनाशकम्।
स्वभक्तभीतिभञ्जनं भजेहराममद्वयम् ॥ 2 ॥

निजस्वरूपबोधकं कृपाकरं भवापहम्।
समं शिवं निरञ्जनं भजेहराममद्वयम् ॥ 3 ॥

सप्रपञ्चकल्पितं ह्यनामरूपवास्तवम्।
निराकृतिं निरामयं भजेहराममद्वयम् ॥ 4 ॥

निष्प्रपञ्च निर्विकल्प निर्मलं निरामयम्।
चिदेकरूपसन्ततं भजेहराममद्वयम् ॥ 5 ॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम्।
गुणाकरं कृपाकरं भजेहराममद्वयम् ॥ 6 ॥

महावाक्य बोधकैर्विराजमानवाक्पदैः।
परंब्रह्मव्यापकं भजेहराममद्वयम् ॥ 7 ॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम्।
विराजमानदेशिकं भजेहराममद्वयम् ॥ 8 ॥

रामाष्टकं पठति यस्सुकरं सुपुण्यं
व्यासेन भाषितमिदं शृणुते मनुष्यः।

sunder kidambi
sadagopan.org
sunder kidambi dot com

विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
संप्राप्य देहविलये लभते च मोक्षम् ॥ 9 ॥

॥ श्रीरामभुजङ्गाष्टकं समाप्तम् ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi

# भद्राचलराममङ्गलम्

रामचन्द्राय जनकराजजा मनोहराय

मामकाभीष्टदाय महित मङ्गलम् ॥ पल्लवि॥

कोसलेन्द्राय मन्दहासदासपोषणाय

वासवादि विनुत सर्वदाय मङ्गलम् ॥ १॥

चारुकुंकुमोपेतचन्दनादिचर्चिताय

हारकटकशोभिताय भूरिमङ्गलम् ॥ २॥

ललितरत्नकुण्डलाय तुलसीवनमालिकाय

जलजसदृशदेहाय चारुमङ्गलम् ॥ ३॥

पुण्डरीकाक्षाय पूर्णचन्द्राननाय

अण्डजातवाहनाय अतुलमङ्गलम् ॥ ५॥

विमलरूपाय विविधवेदान्तवेद्याय

सुमुखचित्तकामिताय शुभदमङ्गलम् ॥ ६॥

रामदासाय मृदुलहृदयकमलवासाय

स्वामि भद्रगिरिवराय सर्वमङ्गलम् ॥ ७॥

इति श्रीभद्रगिरिरामदासविरचितं श्रीभद्राचलराममङ्गलम् ।